॥अथब्रह्मात्मबोधाख्यवेदान्तप्रकरणप्रारंभः॥श्रीशिवोहम्॥पत्राणि॥६॥

॥श्रीगणेशायनमः॥ब्रह्मणोऽनंतशक्तेर्याकाचिद्विघ्नविनाशिनी॥सागणेशाभिधाशक्ति
र्मंगलायास्तुमेसदा॥१॥यस्मिन्नसत्तयाविश्वमसत्यमपिसत्यवत्॥भातितंसच्चिदानं
दंब्रह्मात्मानमहंभजे॥२॥योनिर्द्वंद्वोनिर्विकारोनिरीहोवेदैर्वेद्योवाङ्मनोभ्यामगम्यः॥
शांतःपूर्णःसच्चिदानंदमात्रःसोऽहंसाक्षाद्ब्रह्मरूपोऽहमात्मा॥३॥अधिकारीचविषयःसं
बंधश्चप्रयोजनम्॥अपेक्ष्यतेहिशास्त्रादावनुबंधचतुष्टयम्॥४॥नित्यानित्यविवेक
श्चइहामुत्रविरागता॥शमादिषट्कंमुमुक्षाचाधिकार्येतैस्तुलक्षणैः॥५॥प्रत्यग्ब्रह्मचिदो
रैक्यंविषयोऽत्रसमीरितः॥कर्तव्यताचसंबंधोविचारस्याधिकारिणः॥६॥बाधयित्वा
जीवभावंसाक्षात्कारोयथार्थतः॥स्वात्मनोब्रह्मरूपस्यप्रयोजनमितीरितम्॥७॥यथा
कर्मचितोलोकःक्षीयतेऽत्रतथापरः॥इतिज्ञात्वात्यजेद्धीमानुभोगार्थंलोकवासनाम्॥८॥

नित्यंब्रह्मेवचानित्यंदृश्यंसर्वमिदंजगत्॥निश्चयःसम्यगेवंयोविवेकःश्रुतियुक्तिभिः॥९॥
निग्रहोधींद्रियाणांहिशमशब्देनकीर्तितः।दमोबाह्येंद्रियाणांचनिग्रहःकथितोबुधैः॥१०॥
उपरामस्तुसंन्यासोविधिनाकर्महापनम्॥सतुवैराग्यतान्तम्याच्चतुर्धसंप्रकीर्तितः॥११॥
कुटीचकोबहूदश्चहंसःपरमहंसकः॥वैराग्यंत्रिविधंमंदंतीव्रंतीव्रतरंस्मृतम्॥१२॥
कलत्रपुत्रवित्तादिपरितापाद्यदुःखितम्॥मंदंतत्तत्रसंन्यासाधिकारोनास्तिसर्वथा॥१३॥
मास्मिन्जन्मनिमेस्त्वेवस्त्रीपुत्रद्रव्यवासना॥इतिस्वौविकस्त्यागस्तत्तीव्रंसमुदाहृतम्॥१४॥
भूरादिब्रह्मलोकांतोद्भवभोगेषुवासना॥मास्त्वेवेतिस्थिराबुद्धिंतत्तीव्रतरमुच्यते॥१५॥ स्त
तीव्रेतीव्रतरेतस्मिन्संन्यासोधाममतांमतः।विद्वद्विविदिषाभेदाद्द्विविधःसंप्रकीर्तितः।१६।
कृतोविदिततत्त्वेनविद्वत्संन्यासईरितः॥आप्तोविविदिषासंज्ञस्तत्त्ववेत्तुचिकीर्षुणा॥१७॥

तितिक्षाशीतघर्मादिदुःखानांसहनंस्मृता॥विश्वासोगुरुवेदांतवाक्येश्रद्धाप्रकीर्त्तिता॥१८॥
चित्तैकाग्र्यंसमाधानंयत्नतःश्रवणादिके॥शमादिषट्कमेतच्चाभ्यसनीयंसदाबुधैः॥१९॥
ब्रह्मत्वंजीवतांमुक्त्वाप्राप्तुमिच्छामुमुक्षुता॥एतल्लक्षणकोमुक्तेरधिकार्यत्रसंमतः॥२०॥
विष्णोःशिवस्यवाभक्तिर्निष्कामासरसाहृदि॥प्राक्पुण्यपुंजसंजातामुमुक्षाकारणंहितत्॥२१॥
विषयेष्विंद्रियाणांचकामक्रोधादिवृत्तिषु॥स्वाभाविकीभवेद्ग्लानिर्मुमुक्षालक्षणंहितत्॥२२॥
इत्यनुबंधचतुष्टयप्रकरणम्॥१॥ ॥सच्चिदानंदरूपेस्वेदेहोहमितियामतिः॥सोऽध्या
सोऽज्ञानवशातःसंजातःशुक्तिरूप्यवत्॥१॥यदज्ञानंसैवमायादैवीकात्रिगुणात्मि
का॥वस्तुतोऽभावरूपापिमृगतृष्णेवभासते॥२॥अप्रमेयात्वनिर्वाच्यासदसद्भ्यांवि
लक्षणा॥ययाकृतंचिदाकाशेजगद्गंधर्वपत्तनम्॥३॥मायाविद्येतिनाम्नासाद्विवि

धापरिकीर्त्तिता॥शुद्धसत्ववतीमायाऽविद्यामालिन्यसात्विका॥४॥मायावच्छिन्नचैतन्यंमाया
बिंबोथवेश्वरः॥जीवोऽविद्यापरिच्छिन्नाचिद्वातत्प्रतिबिंबिता॥५॥साऽविद्याविविधाजाताधी
रूपाजीवभूमिकाः॥तस्माज्जीवाअसंख्याताःकर्तृभोक्तृत्वलक्षणाः॥६॥अज्ञानसमुदायत्वं
समष्टिर्वनिवत्स्मृता॥स्वीकारेतदनंतत्वेव्यष्टिर्वृक्षवदीरिता॥७॥तदवच्छिन्नचैतन्यमुक्ता
वीश्वरजीवकौ॥केचिदेवंवदंतीहजगत्सर्वंतदात्मकम्॥८॥तयोरेतेशरीरेहिकारणाख्ये
प्रकीर्त्तिते॥तौतयोरभिमानेनेश्वरप्राज्ञत्वमागतौ॥९॥सर्वेशत्वंभवत्यस्यसर्वज्ञत्वंनियंतृ
ता॥कारणत्वंतथासर्वशक्तिमत्वंतथेशितुः॥१०॥अल्पज्ञत्वंतथाऽविद्याधीनत्वंजीववस्तु
नः॥भोग्यभोक्तृत्वरूपाभ्यांताभ्यामेतद्धिनिर्मितम्॥११॥उपादानंनिमित्तंचकारणंद्विवि
धंस्मृतम्॥निमित्तंशुद्धचैतन्यमुपादानंचमायिकम्॥१२॥आरंभीपरिणामीचविवर्त्तीतत्त्रिधे

रितम्॥ विवर्त्तो घटते नैवा परो द्वैतो न कथचन॥१३॥ तस्माच्छब्दवदाकाशस्ततः स्पर्शगुणोनिलः॥
तस्मात्तु रूपवत्तेजस्ततो रसगुणं जलम्॥१४॥ ततो गंधवती पृथ्वीत्येवं ब्रह्मांडगोलकम्॥ पूर्वानुवृ
त्तितो ज्ञेया गुणा एकोत्तराधिकाः॥१५॥ एतेषां सूक्ष्मभूतानां व्यस्तानां सत्वभागतः॥ श्रोत्रत्वङ्नेत्र
जिह्वाख्यघ्राणकानींद्रियाणि च॥१६॥ जातानि शब्दपूर्वाणां ग्राहकाणि पृथक् पृथक्॥ तैरंतःकरणं सर्वै
त्र रंशैः स्याच्चतुर्विधम्॥१७॥ वृत्तिभेदैर्नवैचित्तमनो बुद्ध्यहमात्मकम्॥ एतेषामेव भूतानां राजसां
शाद्यथाक्रमम्॥१८॥ वाक्पाणिपादपायूपस्थानि कर्मेंद्रियाणि च॥ रजोंशैर्मिलितैस्तेषां जातः
प्राणः स पञ्चधा॥१९॥ प्राणोपानः समानश्च व्यानश्चोदान इत्यपि॥ लिंगं शरीरमेतेषां संघा
तः संप्रकीर्त्तितम्॥२०॥ पंचकं धींद्रियाणां च कर्माक्षाणां च पंचकम्॥ प्राणादिपंचकं चांतःक
रणानां चतुष्टयम्॥२१॥ पञ्चकं भूतसूक्ष्माणामविद्याकामकर्म च॥ संघातः सर्वभावानां पुर्यष्टक

भितीरितम्॥२२॥ब्रह्मलोकादिसंसारफलेऽनित्येतु नित्यधीः॥स्वस्त्रीपुत्रादिदेहेषुश्शुचिधीरशुचि
२ख ष्वपि॥२३॥दुःसाधनभूतेषुसुखधीर्विषयेष्वपि॥अनात्मरूपदेहादिष्वहमित्यात्मबुद्धिता॥२४॥
चतुर्विधेतिविद्वद्भिरविद्यापरिकीर्त्तिता॥कामःसंकीर्त्तितःप्रीतिःसानुकूलेषुवस्तुषु॥२५॥
संचितंक्रियमाणंचप्रारब्धंकर्मतुत्रिधा॥क्रियमाणंचतल्लोकेऽस्मिन्जन्मनियत्कृतम्॥२६॥
पूर्वजन्मार्जितंकर्मसंचिताख्यमुदाहृतम्॥शरीरारंभकंकर्मप्रारब्धमितिकीर्त्तितम्॥२७॥
संचितागामिनोर्नाशःकर्मणोस्तद्विरोधिना॥ब्रह्मज्ञानेनभोगेननाशोवाकथितस्तयोः॥२८॥
जातेपिब्रह्मविज्ञानेप्रारब्धकर्मणःक्षयः॥विनाभोगेननैवस्याच्छरीरारंभकंयतः॥२९॥
पंचकंपूर्वमेवोक्तंपंचज्ञानेंद्रियादिकम्॥अविद्याचास्मितारागोद्वेषश्चाभिनिवेशकः॥३०॥
पंचक्लेशाइमेत्येषांनाशःस्यादात्मबोधतः॥अहंकारस्यसूक्ष्मायावस्थासेवास्मितास्मृता॥३१॥

रागः प्रीतिर्हिरुट् द्वेषोऽभिनिवेशोऽत्र पंचमः ॥ स्वीकृतस्य पुनस्त्यागासहिष्णुत्वं प्रकीर्तितः ॥ ३२ ॥
ईशो हिरण्यगर्भेत्रि प्राज्ञस्तैजसतां गतः ॥ अथ स्थूलशरीरार्थं पञ्चीकरणमुच्यते ॥ ३३ ॥
द्विधैकैकं पुराकृत्वा पञ्चांशानु स्थाप्य चैकतः ॥ चतुर्धा तत्परानूकृत्वा स्वेतरेषु नियोजयेत् ॥ ३४ ॥
पञ्चीकरणमित्येवं स्थूलदेहस्ततो भवेत् ॥ विराड्हिरण्यगर्भेत्रि तैजसो विश्वतां गतः ॥ ३५ ॥
अध्यारोपोयमित्युक्तः स एवाध्यास ईरितः ॥ अन्यत्रान्यावभासश्च लक्षणं तदुदाहृतम् ॥ ३६ ॥
चैतन्यस्य तु देहादौ देहादीनां च चेतने ॥ इत्थमन्योन्यतादात्म्याद् अध्यासोऽनादिसंभवः ॥ ३७ ॥
वास्तवात्मप्रबोधेन नाश्योसौ नान्यसाधनैः ॥ अतोऽवश्यं बुधैः कार्यमात्मतत्त्वविवेचनम् ॥ ३८ ॥
इत्यध्यासप्रकरणम् ॥ ॥ पुत्रे नष्टे प्रनष्टोहं दुःखिते दुःखितोप्यहम् ॥ अत्यंतप्राकृतैरेवं पुत्र
आत्मेति मन्यते ॥ १ ॥ ज्वलनज्वलिते गेहे ज्वलितं तनयं पितुः ॥ त्यक्त्वा दृष्टं बहिर्यानं तस्मात्सुत्र

स्यनात्मता ॥२॥ गौरोहं श्यामलोहं च पुष्टोहं स्यामहं कृशः ॥ इत्याद्यनुभवात्केश्चिद्देह आत्मेति
भण्यते ॥३॥ इमं देहं विहायात्र दृष्टा लोकांतरे गतिः ॥ तस्माद्भवितुमर्हो नायमात्मत्वं कथं
चन ॥४॥ पश्येश्टणोमि जिघ्रामि वच्मीत्याद्यनुभूतितः ॥ वदंतींद्रियमात्मेति पूर्वेभ्यः सूक्ष्मदृ
ष्टयः ॥५॥ इंद्रियाणां विनाशेपि जीवनं पुंसि दृश्यते ॥ चक्षुरादींद्रियाणां च घटते नात्मता ततः ॥६॥
ततः सूक्ष्मविचारज्ञा मुख्यं मत्वेंद्रियादिषु ॥ प्राण आत्मेति मन्यंते प्राणोपास्तिपरायणाः ॥७॥
अचेतनस्त्वयं प्राणो भवत्यात्मा तु चेतनः ॥ तस्मात्प्राणोपि नैवार्ह आत्मत्वं भवितुं किल ॥८॥
संकल्पश्चैव विकल्पश्च संभोगः सुखदुःखयोः ॥ स्यादेव मनसस्तस्मान्मन आत्मेति कथ्यते ॥९॥
विज्ञानमूलकत्वं हि मनसो भवति स्फुटम् ॥ अहंवृत्तिरिदंवृत्तिर्द्विधांतःकरणं स्मृतम् ॥१०॥
अहंवृत्तिर्हि विज्ञानमिदंवृत्तिर्मनो भवेत् ॥ अहंवृत्तिं विनानेदंवृत्तिर्भवति निश्चितम् ॥११॥

बहिर्वृत्तेर्मनसोऽस्यनात्मताघटतेऽन्नहि॥वदंत्यात्मेति विज्ञानं बौद्धाः क्षणिकवादिनः॥१२॥
उत्पत्तिश्च लयश्चापिबुद्धिवृत्तेः क्षणेक्षणे॥प्रकाशत्वात्स्वतोऽस्त्वाद्विज्ञानं नात्मतामियात्॥१३॥
विज्ञानशब्दवाच्याधीर्याबुद्धेः परतस्तु सः॥इत्युक्तमस्तिगीतायां तस्मादात्मा ततः परः॥१४॥
केचिदात्मानमप्यन्ये नास्तिकाः शून्यवादिनः॥असदेवपुराशून्यमात्मेति प्रवदंत्यतः॥१५॥
अधिष्ठानं विना भ्रांतेरभावादस्तितात्मनः॥विनैवसाक्षिणं शून्यमात्मेत्युक्तिः कथं भवेत्॥१६॥
ब्रुवंस्यस्तीति केप्यात्माविज्ञानमयतोंतरः॥आनंदमयसंज्ञोसौ नात्माजाड्यलहरीनात्॥१७॥
वाक्याभासान्यथाबुद्धिं गृहीत्वास्वस्वयुक्तिभिः।वादिनस्ते व्यतत्वज्ञा विवदंत्यात्मनिश्चये॥१८॥
एवं मायेश्वरी काचिद्भ्रमयत्यखिलान्जनान्॥सच्चिदानंद आत्मापि जीवरूपः कृतो यया॥१९॥
यथेंद्रजालकी माया जनानां मोहकारिणी॥दुर्घटं घटयित्वैव तथासंदर्शयत्यसौ॥२०॥

यथा शैत्यं द्रवत्वं च तोये वन्हेर्यथोष्णता ॥ मायायां दुर्घटत्वं च स्वतो नैव तथान्यतः ॥२१॥
अंकुराणि करादीनां कुतो गर्भस्थरेतसः ॥ चैतन्यं कुत आयाति कुतोस्थिपललत्वचः ॥२२॥
जननानंतरं केन बालयौवनवृद्धता ॥ तस्माद्दृश्यं जगत्सर्वमिंद्रजालमिदं महत् ॥२३॥
तथैव बीजवृक्षस्य शाखापत्रफलानि हि ॥ जातानि कथमित्येवं तर्कनीयं कदापि न ॥२४॥
अतर्क्यं चैव मायेयं परिहारोऽस्याः प्रयत्नतः ॥ आत्मतत्वविवेकश्च कर्त्तव्यः सुखमिच्छता ॥२५॥
पुत्राद्यात्माभ्य एतेभ्य आत्मान्योस्ति चिदात्मकः ॥ यदीयचेतनेनेमे जडाश्चेतनतां गताः ॥२६॥
यद्यद्वस्तुनि चैतन्यं तत्तस्यागे कृते सति ॥ यच्छेषं ब्रह्म चिन्मात्रं तदेवं ब्रह्मनिश्चयः ॥२७॥
इति पुत्राद्यनात्मप्रकरणम् ॥ पंञ्चकोशगुहागूढं ब्रह्मास्ति तद्विचारणाम् ॥ विना न ज्ञायते
तस्मात्स वक्ष्ये तद्विवेचनम् ॥१॥ पितृभुक्तान्नजाज्जातो रेतसोन्नेन वर्द्धितः ॥ परिणामोस्य देहोऽ

यंकोशश्चान्नमयः स्मृतः ॥२॥ अन्नस्यैव विकारत्वान्नायमात्मा कथंचन ॥ व्यापकः सर्वना
डीषु तथाक्षाणां प्रवर्त्तकः ॥३॥ बलदेर्वयवादीनां नात्मा प्राणमयो जडः ॥ चक्षुरादींद्रियाणां
हि भोगे च्छिद्धां करोति यः ॥४॥ तद्द्वैर्भ्रांतिमापन्नः स आत्मा न मनोमयः ॥ सुषुप्तौ लीयते
देहं जागरे व्याप्य तिष्ठति ॥५॥ चिच्छायांकितधीर्नात्मा विज्ञानमयशब्दिता ॥ लीने बुद्ध्या
दिके सुप्तावात्मानं प्रतिबिंबिता ॥६॥ चिदानंदमयो नात्मा क्वाचित्कत्वात्समस्त्वतः ॥ देहादार
भ्य सुप्तांता नात्माहीस्युः कदाचन ॥७॥ मय उक्त विकारार्थे नात्मा भवितुमर्हति ॥ वैकारिकः
कदाचित्तु शुद्धत्वान्निर्गुणत्वतः ॥८॥ जागरेन्नमयः कोशः स्वप्ने कोशत्रयं ततः ॥ आनंदमय
कोशोंत्यः सुषुप्तौ हेयो विचक्षणैः ॥९॥ कीदृगात्मास्तितर्ह्यत्र तादृगीदृग्विवर्जितः ॥ तादृक्
परोक्षकं ज्ञेयं मीदृगिंद्रियगोचरम् ॥१०॥ अतादृगनिदं रूपं वस्तुतः परमात्मनः ॥ ॥

ता। शून्यश्चेन्मास्तु शून्यत्वमस्तीतितस्यसत्वतः॥११॥ योवक्तिममदेहोयंममप्राणश्चमेमनः॥ ॥
ममधीर्ममजाड्यंचसुप्तोह्याहंयथासुखम्॥१२॥ सआत्मैतस्यसर्वेमीममताविषयत्वतः॥
दृश्याःशक्यानतंवेत्तुंवेत्तिसर्वान्सएवहि॥१३॥ तदानकोपितंविद्यात्तदज्ञानेनमुक्तता॥
मैवंयोनुभवेत्सर्वंतंतुकोनुभवेत्पुनः॥१४॥ स्वीयानुभवरूपत्वान्नैवात्रान्यानुभाव्यता॥
ज्ञातृज्ञानज्ञेयरूपात्रिपुटीपरिवर्जनात्॥१५॥ एवमात्मापंचकोशान्साक्षित्वेनानुभूयते॥
स्वभासाभासयन्नेतान्स्वयमेवप्रभासते॥१६॥ मुंजवल्कलवत्कोशमेकैकमपसार्यच॥
प्रत्यक्चिदात्मरूपंस्वंयत्नतोमृगयेत्सुधीः॥१७॥ पंचकोशपरित्यागेयस्तत्साक्ष्यवशेषितः॥
प्रत्यगात्मास्वप्रकाशस्तत्स्वरूपंहिवास्तवम्॥१८॥ चैतन्यच्छाययायुक्ताशक्तिश्चिदिवभासते॥
तच्छक्त्युपाधिसंयोगाद्ब्रह्मापीश्वरतांगतम्॥१९॥ कोशोपाध्युपसंसृष्टंब्रह्मजीवत्वमागतम्॥

शक्तिकोशविवक्षायां नेशो जीवो पितात्र हि ॥२०॥ पिता पितामहादित्वं पुत्रपौत्राद्यपेक्षया ॥
यथा पुत्राद्यभावे तु न पिता तत्पितादिता ॥२१॥ एवं कोशविवेकेन प्रत्यक्तत्वविबोधनम् ॥
यः प्राप्नुयात्स तु ब्रह्म भवेच्छान्तमनाः पुमान् ॥२२॥ इति पंचकोशविवेकः ॥ शिवोऽहम् ॥
अथ वक्ष्येऽधुना बोधसिद्ध्यै सदधिकारिणाम् ॥ तत्त्वमसीति वाक्येन तत्त्वंपदविशोधनम् ॥१॥
तटस्थाख्यं स्वरूपाख्यं तत्पदस्य च लक्षणम् ॥ यतो वेमानि भूतानि जायन्ते येन जीवनम् ॥२॥
इति श्रुत्या तटस्थाख्यं लक्षणं समुदाहृतम् ॥ सत्यं ज्ञानमनन्तं चानन्दो ब्रह्मेति वाक्यतः ॥३॥
लक्षणं तु स्वरूपाख्यं विज्ञेयं परमेशितुः ॥ तटस्थं मायिकं ज्ञेयं स्वरूपाख्यममायिकम् ॥४॥
ईशस्तत्पदवाच्यार्थो मायावच्छिन्नचेतनम् ॥ शुद्धमद्वयचैतन्यं लक्ष्यार्थस्तत्पदस्य हि ॥५॥
जीवस्त्वंपदवाच्यार्थोऽविद्यावच्छिन्नचेतनम् ॥ प्रत्यग्विशुद्धचैतन्यं लक्ष्यार्थस्त्वंपदस्य च ॥६॥

इत्थंयस्तत्त्वमस्यादिवाक्याज्जीवेशशोधनम्॥ करोतिसपुमान्स्वात्मरूपंलब्ध्वाविमुच्यते॥१६॥
इतितत्त्वंपदशोधनम्॥ ॥जगदृश्यमनुभूतंहिसाक्षाद्व्यवहृतिक्षमम्॥असदेवतथापीदंस्व
प्नःस्वसमयेयथा॥१॥स्वप्नोजागरणेमिथ्यालीनःस्वप्नेपिजागरः॥स्वप्नश्चजागरोलीनः
सुप्तौसुप्तिस्तयोर्नहि॥२॥तिस्रोवस्थाइमाज्ञेया मिथ्यात्रयगुणात्मिकाः॥सात्विकीराज
सीज्ञेयास्तामसीजागरादिकाः॥३॥अहमद्यसुखंसुप्तोनहिकिंचिदवेदिषम्॥इत्याद्यनु
भवात्सुप्तौसत्वंमेयंपरात्मनः॥४॥अद्यस्वप्नोमयादृष्टोविचित्रश्चविलक्षणः॥प्रबोधेसर्व
लोकोक्तेस्तत्रापिसत्वमात्मनः॥५॥जाग्रतोहंस्वप्नद्रष्टाव्यवहारंकरोम्यतः॥सत्ताजागरणे
व्यस्तिब्रह्मणःपरमात्मनः॥६॥अवस्थात्रितयेपीहसत्तैकस्यैवसाक्षिणः॥शब्दादिविष
यान्वेत्तिजागरेत्विंद्रियैःपरः॥७॥मनसावेत्तिसद्वासैःस्वप्नेभोग्यान्तदर्जितान्॥ ॥

विरुद्धधर्मिणोरित्थंपदयोरनयोरिह॥भागलक्षणयैवस्यासामानाधिकरण्यता॥७॥
यथासोयंदेवदत्तइत्यत्रकालरूढिदाम्॥त्यक्त्वापिंडेस्यतासमर्यंतथैवात्रापिचिंतयेत्॥८॥
तत्पदस्यतुपारोक्ष्यंत्वंपदस्यापरोक्षता॥एतदंशद्वयंत्यक्त्वाचिदैक्यंलक्षयेत्तयोः॥९॥
प। मायाऽविद्योथवोधीसमष्टिव्यष्टिरूपके॥चिन्मात्रंलक्षयेत्त्यक्त्वातत्त्वंवाच्येशजीवयोः॥१०॥
जीवेशयोरधिष्ठानंप्रत्यगद्वयचेतनम्॥कूटस्थब्रह्मसंज्ञंतन्नैवभिन्नंकदाचन॥११॥
कार्यकारणरूपेणभोक्तृभोग्यत्वरूपतः॥जीवेशाभ्यांजगत्सर्वंनष्टद्वंद्वंविनिर्मितम्॥१२॥
नभिन्नंनाप्यभिन्नंचजगदीश्वरतोयतः॥जलबुद्बुदवत्तस्मादनिर्वाच्यमिदंततः॥१३॥
तस्माद्धीमान्विवेकेनजगज्जीवपरात्मनाम्॥बाध्यंजीवजगद्भावंब्रह्मतत्त्वंचलक्षयेत्॥१४॥
सुनिश्चयोमसैवेतिबाधोनात्रास्यदर्शनम्॥अन्यथासुप्तिमूर्छादौमुच्येरंस्कलतपोरुषः॥१५॥

सएषानैर्द्वैतज्ञानमानंदंसौषुप्तमनुभूयते॥८॥इत्याद्यनुभवात्सत्वंसदैवस्याच्चिदात्मनः॥ ॥
त्रुट्यादिकालमारभ्यप्राकृतप्रलयावधि॥९॥एकरूपत्वमेतस्यानंतस्यपरमात्मनः॥ ॥
सद्रूपोपिप्रकाशात्माऽनाद्ययाँविद्ययावृतः॥१०॥केनचिन्नानुभूतःस्यात्तमसावृतवस्तुवत्॥
विद्ययानाशितेऽज्ञानेस्वयमेवानुभूयते॥११॥सद्वैवासीत्पुरातस्यकाचिच्छक्तिस्तदाश्रिता॥
अकल्पयद्विकारंहितत्रचित्रंपटेयथा॥१२॥अवकाशात्मकोंऽशोविकारःप्रथमोभवेत्॥ का
आकाशोऽस्तीतिचाकाशेसत्तानुव्रजतिध्रुवम्॥१३॥सत्तावकाशांवाकाशेसतिसत्तैवकेवलम्॥
एवंसत्वंचवाय्वादिष्वनुस्यूतंस्वभावतः॥१४॥सत्वेतेनानुगच्छंतितेषुसत्तानुगच्छति॥
सत्वस्याधिकवृत्तित्वाद्धर्मित्वंसत्ववस्तुनः॥१५॥एतेषामंबरादीनांधर्मतापरिकीर्तिता॥
पृथक्कृतायांसत्तायांविविच्यपरयाधिया॥१६॥अंबराद्यास्तुसद्रूपाःपरिशेषाःकिमात्मकाः॥

भ्रांतिचेद्भ्रांतु निःसत्वाः स्वाप्नाः सिंहादयो यथा॥१७॥वास्तवी व्यावहारी च प्रातिभासी त्रिधेरिता॥
सत्ता स्याद्वास्तवी शस्य व्यावहार्यंबरादिषु॥१८॥रज्जुसर्पादिकेष्वेवं सत्ता स्यात्प्रातिभासिकी॥
सत्यत्वमंबरादीनां व्यवहारार्थमेव हि॥१९॥आसं बाल्ये पुरा योहं बालहेलनतत्परः। स एवाह
मिदानीं तु यौवने शिष्टतां गतः॥२०॥इत्याद्युपार्जनं कुर्वन्नैमूयेस्मितादिकम्॥यदा वृद्धो भवि नु
ष्यामि करिष्याम्यात्मचिंतनम्॥२१॥सर्वो क्लिरासमासंहिनासंनेति कदाचन॥लोकोक्तेरि
त्यपि ज्ञेयं त्रैकालं सत्त्वमात्मनः॥२२॥बाल्ययौवनवृद्धत्वं देहे कालांगनिर्मितम्॥नाद्ययात्म
नि कालोस्त्यवयवानां तु का कथा॥२३॥सन्मात्रएवसंभाव्यमाकाशादिषु वस्तुषु॥नाम
रूपात्मकेष्वेषु सर्वेषु न्यावन्वेष्वपि॥२४॥एवं विचार्य संज्ञातं येन ब्रह्मात्मकं परम्॥स एव
ब्रह्मरूपात्मा भवत्येव न संशयः॥२५॥इति सद्विवेकः॥ ॥

यद्यसुखंभवेदत्रविनैवविषयेंद्रियैः॥तत्तद्ब्रह्मसुखंसर्वमेवंवेदांतनिश्चयः॥१०॥
सुखदुःखांतरालेचकस्मिंश्चित्समयेपुमान्॥स्वीयंसुखमुदासीनंजागरेप्यनुभूयते॥११॥
नमेकाप्यधुनाचिंतासुखमासेवदन्निति॥निजानंदोप्यहंकाराद्याछादितत्वान्नभासते॥१२॥
आत्माप्रियतमोलोकेप्रियमन्यत्सुतादिकम्॥स्वात्मार्थंप्रेमसर्वेषुपुत्रदारगृहादिषु॥१३॥
स्वानुकूलोयदापुत्रःप्रीतिस्तत्रतदाभवेत्॥स्त्रियामपितदाप्रेमपत्युःसाहितमाचरेत्॥१४॥
एवमन्येष्वपिज्ञेयंपशुद्रव्यगृहादिषु॥आत्मभोगार्थमेवास्तिप्रेमनैवतदर्थकम्॥१५॥
भूयासंसर्वदैवाहंमानभूवंकदाचन॥इत्युक्तंसर्वलोकस्यदृष्टंप्रेमनिजात्मनि॥१६॥
व्यभिचारिसुखंजन्यमात्मीयंस्यान्निसर्गकम्॥आत्मन्येवततःकुर्यात्प्रेमाकर्ष्यसुतादितः॥१७॥
एषएवनिजानंदोखंडोब्रह्मरसात्मकः॥विषयानंदएतस्यैवांशभूतोस्तिनपृथक्॥१८॥

सजातीयविजातीयस्वगतभेदशून्यता॥त्वनवच्छिन्नतावस्तुदेशकालैरखंडता॥१९॥
कल्पितत्वात्प्रपंचस्य विजातीयभिदा नहि॥सजातीयभिदाप्येवं नैवस्याज्जीवात्मनोरिह॥२०
स्वगोप्येकरसत्वान्नो भेदोस्येवमखंडता॥सर्वात्मकत्वतोवस्तुपरिच्छेदोनदेशतः॥२१॥
विभुत्वादपरिच्छिन्नोनित्यत्वात्कालतोपिच॥अखंडत्वंत्रिधैवंस्याद्ब्रह्मण्येवनिसर्गजम्॥२२॥
निजानंदोपिसर्वत्रसदानैवप्रकाशते॥रजस्तमःकर्मजन्यप्रतिबंधतिरोहितः॥२३॥
कदाचित्कस्यचित्तुंसः सत्वापादितकर्मणः॥स्वच्छस्फटिकवद्धीःस्यादानंदांशोदयस्तदा॥२४॥
अन्यद्यक्षिप्तुवास्वस्मिन्नानंदःप्रतिभासते॥व्यत्त्युपेक्षणतःशेषमात्मरूपंतदेवहि॥२५॥
स्वयंप्रकाशःकूटस्थःप्रत्यक्स्थोनिश्चलोऽव्ययः।सद्भिःस्वात्मानुभाव्यःसच्चिदानंदपदैस्त्रिभिः॥१॥
नत्रीण्येतानिनामान्यन्नामस्यपरमात्मनः॥असत्यजडदुःखानांव्यावृत्त्यर्थंपदत्रयम्॥२॥

सच्चिदानंदता धर्मो नाद्व्य यस्तान भस्त्ववत्॥ नानाव्यक्तिषु धर्मत्वं घटादिषु यथा भवेत्॥३॥
गुणेपि सा भवेन्नैव निर्गुणत्वाच्छ्रुतीरितात्॥ सच्चिदानंदता तस्मात्स्वरूपमेव परात्मनः॥४॥
अभिन्नाः सच्चिदानंदाः पर्यायास्ते परस्परम्॥ कल्कत्वानेहनाने तिनोनात्वं नैवचात्मनः॥५॥
दा सर्वव्यक्तिषु विज्ञेया सच्चिदानंदता समा॥ तथापि कुत्रचित्सत्ता सत्ता चित्तेच कुत्रचित्॥६॥
भासंते कुत्रचित्तिस्रः सच्चिदानंदताः स्फुटाः॥ मूढा घोरा च शांता च त्रिधा बुद्धेश्च वृत्तयः॥७॥
तामसी राजसी ज्ञेया सात्विकी च यथाक्रमम्॥ सत्तैव भाति मूढासु सत्ता चित्ते परासु च॥८॥
सत्ता चित्तानंदता च स्पष्टाः शांतासु भांति ताः॥ गुणानां तारतम्याच्च तारतम्यं सदादिषु॥९॥
एवं सच्चित्सदानंद विवेकं यः करोति वै॥ सच्चिदानंदमात्मानं प्राप्य शांतिं स गच्छति॥१०॥
इति सदादिपदत्रय निरूपणम्॥ ॥इत्येवं श्रवणं प्रोक्तं कृत्वै काग्रेण चेतसा॥ मननं

१८ हि ततः कुर्याच्छ्रुतस्यार्थस्य चिंतनम् ॥१॥ बोधहेतुकशास्त्राणां बहुधाचार्यवक्त्रतः ॥ कृते
पि श्रवणे ज्ञानं नैव स्यात्प्रतिबंधतः ॥२॥ भूतो भावी वर्त्तमानः प्रतिबंधस्त्रिधोदितः ॥ कृत्वा
सक्तिं पुरा स्त्र्यादिष्वनुभूतं च यत्स्मरत्वम् ॥३॥ तस्मत्त्यागात्स्तवाप्राप्तिर्नैव स्याच्छ्रवणादिके ॥
भूतोयं प्रतिबंधस्तु भावी प्रारब्धरोधतः ॥४॥ ब्रह्मलोके छयावाथ वर्त्तमानोधुनोच्यते ॥
संशयविपर्ययो कुतर्को विषयासक्तिर्धीमांद्यादिदुराग्रहः ॥५॥ प्रतिबंधक्षये बोधो जायते भ्यासकारिणाम् ॥
जातेपि बोधे देहादावात्मधीर्न निवर्त्तते ॥६॥ असंभावान्यथा चैव संदेहश्च विपर्ययात् ॥
तस्मादेषां विनाशाय निदिध्यासनमभ्यसेत् ॥७॥ देह एवाहमस्मीति वासनानादिकालजा ॥
संजाता सुदृढाभ्यासाद्दुस्त्यजानात्मदर्शिभिः ॥८॥ वासनैव हि संसारे नानाजन्मप्रदायिनी ॥
वासनेवात्मबोधे तु प रमं विघ्नमीरितम् ॥९॥ द्विविधोदाहृता सैव बाह्याभ्यंतरसंज्ञका ॥

ममतापुत्रवित्तादावाद्यादेहात्मधीःपरा॥१०॥अतःसासर्वथात्याज्याद्विविधैवप्रयत्नतः॥त
यैवाछादितःस्वात्माजलनील्यायथाजलम्॥११॥वासनानामनेकानांकोशश्चित्तमितीरितम्॥
चित्तोदयलयाभ्यांचसंसारोद्भवनाशकौ॥१२॥चित्तस्यहिनिरोधोहिसंसारोछेदहेतवे॥
प्रकर्त्तव्यःप्रयत्नेनस्यान्निदिध्यासनादिभिः॥१३॥सजातीयप्रवाहश्चविजातीयतिरस्कृ
तिः॥नैदिध्यासनकंपूर्वैर्लक्षणंसमुदाहृतम्॥१४॥ब्रह्मण्येवानुसंधानंचित्तवृत्तेःसु
संततम्॥अपरंतैलधारावन्निदिध्यासनलक्षणम्॥१५॥अहंब्रह्मास्म्यहंब्रह्मास्म्यहं
ब्रह्मेतिसंततम्॥यश्चिंतयेत्सतुब्रह्मभवेद्भ्रमरकीटवत्॥१६॥यंयंवापिस्मरन्भावंत्य
जत्यंतेकलेवरम्॥तंतमेवैतिकौंतेयसदातद्भावभावितः॥१७॥इत्युक्तंवासुदेवेनगीता
यामर्जुनंप्रति॥किंवहंस्यपिलोकेस्तियामतिःसागतिर्भवेत्॥१८॥ततःसमाधिःकर्त्तव्यः

सविकल्पकसंज्ञकः॥ निर्विकल्पं ततः कुर्याच्चित्तरोधनहेतवे॥१९॥ अष्टांगानियमादीनि
योगशास्त्रोदितानि वै॥ पुराज्ञात्वैव योगस्य समाधिः क्रियते ततः॥२०॥ चित्तवृत्तिनिरोधो
हि लक्षणं योगस्य लक्षणम्॥ वृत्तिनिरोधार्थमत्रापि योगोऽवश्यमपेक्षितः॥२१॥ द्वौ क्रमौ चित्त
नाशस्य योगो ज्ञानमितीरितम्॥ उपदिष्टा वशिष्ठेन या शिष्यां राघवं प्रति॥२२॥ अथेदानीं
राजयोगं वक्ष्ये पंचदशांगकम्॥ यं विज्ञायांजसैवेह ब्रह्मत्वं प्रतिपद्यते॥२३॥ यमश्च नियम
स्त्यागो मौनं देशस्ततः परः॥ कालश्चासनकं ज्ञेयं मूलबंधस्तथैव च॥२४॥ देहसाम्यं दृशः
स्थैर्यं प्राणसंयमनं ततः॥ प्रत्याहारो धारणा ध्यानं समाधिरिति क्रमात्॥२५॥ ब्रह्मेतीदं ज
गत्सर्वं ज्ञानादिंद्रियनिग्रहः॥ उत्तमोयं यमो ज्ञेयो विजातीयतिरस्कृतिः॥२६॥ सजा
तीयप्रवाहश्च नियमोत्र समारितः॥ नामरूपप्रपंचस्य हानं चित्त्वावलोकनात्॥२७॥

त्यागोऽयं भुक्तिमुक्तिदः प्रोक्तोऽध्यात्मविद्याविशारदैः॥ यतो वाचो निवर्त्तन्ते अप्राप्येति श्रुतीरितात्॥२८॥
योगिगम्यं हि यन्मौनं तद्देतत्सद्भिरीरितम्॥ बालवन्मूकवन्मौनं राजयोगे न कीर्त्तितम्॥२९॥
आदौ मध्ये तथांते च यत्रास्ति जनशून्यता॥ येन सर्वमिदं व्याप्तं मुक्तो देशः स निर्जनः॥३०॥
ब्रह्मादिसर्वभूतानां कलनं यत्र जायते॥ कालः स एव निर्दिष्टो रवंडो निरवयवः स्मृतः॥३१॥
भवेद्यत्र सुखेनैव सततं ब्रह्मचिंतनम्॥ विश्वस्य यदधिष्ठानं मासनं तत्सदीरितम्॥३२॥
लोकानां चेतसश्चैव यन्मूलं बंधनं स्मृतम्॥ प्रोक्तः समूलबंधोऽत्र सेव्योऽयं राजयोगिभिः॥३३॥
अंगानां हि समत्वं तत्समे ब्रह्मणि यो लयः॥ अतोऽन्यन्न समत्वं हि भवेन्नीरसदारुवत्॥३४॥
द्रष्टृदर्शनदृश्यानां यस्मिन्नुपरतिर्भवेत्॥ दृक्स्थितिस्तत्र कर्त्तव्या नैव नासाग्रवर्त्तिनी॥३५॥
बोधप्रचुरया दृष्ट्या पश्येद्ब्रह्ममयं जगत्॥ सा दृष्टिरुत्तमा क्वाऽनो नासालोकनशालिनी॥३६॥

इमेचित्तादयःसर्वेभावाब्रह्मैवनेतरत्॥इतिभावनयावृत्तिनिरोधःप्राणसंयमः॥३७॥
ति जगन्निषेधनंवायोरेचनंपरिकीर्तितम्॥अहंब्रह्मैवयावृत्तिर्वायोःपूरकमीरितम्॥३८॥
यो ब्रह्मवृत्तेःसुनैश्चल्यंप्राणवायोश्चकुंभकम्॥प्राणायामःप्रबुद्धानामयंनघ्राणपीडनम्॥३९॥
विषयानात्मभूतान्वैसंप्रेक्ष्यमनसश्चितौ॥मज्जनंहिसततंसेव्यःप्रत्याहारोयमुत्तमः॥४०॥
मानसंयत्रयत्रैतितत्रतत्रात्मदर्शनात्॥मनसोधारणंयत्तुसापराधारणास्मृता॥४१॥
चिद्घनात्माहमस्मीतिसद्वृत्त्यामनसःस्थितिः।निरालंबतयायाहितद्ध्यानंमंगलंपरम्॥४२॥
परमस्वच्छयावृत्त्याचिद्घनाकाररूपया॥सर्वविस्मरणंयत्ससमाधिर्बोधकारकः॥४३॥
राजयोगोयमित्युक्तःसेव्योसौराजयोगिभिः॥साक्षात्कारोभवेद्यावत्तावदेवंनिरंतरम्॥४४॥
सप्ताज्ञानस्यबोधस्यसप्तवक्ष्येत्रभूमिकाः॥बीजजाग्रच्चजाग्रच्चमहाजाग्रत्ततःपरम्॥१॥जाग्र
त्स्वप्नस्ततःस्वप्नःस्वप्नजाग्रत्सुषुप्तिका॥मायेश्वरीजगद्बीजंबीजजाग्रन्नदुच्यते॥२॥ ॥

अंकुरोन्मुखतांबीजंयथैतिजलयोगतः।जगदंकुररूपासाचित्सत्तायेनजा[illegible]॥३॥जगतःप्र
थमावस्थाजाग्रच्छब्दोदिताचसा॥सूक्ष्मोहंकारएषोत्रप्रथमोध्यासईरितः॥४॥अहंकारोमहा
जाग्रद्वृक्षेपत्रफलादिवत्॥येनसर्वमिदंजातंनामरूपात्मकंजगत्॥५॥इयंजाग्रदवस्थाचोच्यतेव
स्थात्रयेजनैः॥जाग्रदेवमनोराज्यंयदाजीवःकरोतिहि॥६॥जागरेस्वप्नवद्ध्यायन्जाग्र[illegible]ःस
ईरितः॥सर्वानुभूतोलोकेयःस्वप्नःसस्वप्नउच्यते॥७॥स्वप्नेदृष्टपदार्थस्यजागरेयद्धि[illegible]
क्ष स्वप्नजाग्रत्तदेवोक्तंजनैःसत्यैववस्तुवत्॥८॥षडवस्थामतिक्रम्यसप्तमीस्यात्सुषुप्तिका॥इ[illegible]द
मोहस्यविज्ञेयाभूमिकाबुधैः॥९॥शुभेच्छाप्रथमाभूमिश्चाधिकारात्मिकातथा॥वि[illegible]
तिप्रायाद्वितीयका॥१०॥तनुमानसरूपाचतृतीयामननात्मिका॥सत्वापत्तिश्चतुर्था[illegible]
रूपिणी॥११॥पंचम्याह्यनुभूतिश्चतथासंसक्तमानसा॥पदार्थाभाविनीषष्ठीस्वानं[illegible]
ता॥१२॥तुरीयासप्तमीमोक्षासहजानंदरूपिणी॥ततःपरंनिजंरूपंसच्चिद्ब्रह्मात्मकंपरम्॥१३॥
पूर्वभूमित्रयेजाग्रत्सर्वंविदृश्यतेजगत्॥चतुर्थीस्वप्नइत्यत्रस्वप्नवद्दृश्यतेहितत्॥१४॥ ॥

आद्यावस्थाबोधसुप्तेःपंचमीभूमिकास्मृता॥नविद्यतेत्रसंसक्तिःसकलेष्वपिवस्तुषु॥२५॥षष्ठी
घनसुषुप्तिःस्याद्गूढसुप्तिस्तुसप्तमी॥तृतीयाभूमिमारभ्यलक्षणंप्रोच्यतेधुना॥१६॥देहारम्भ
धियंयावज्ज्ञानास्तेषामनेकधाम्॥चेष्टांसंप्रेक्ष्यसंयातिविस्मयंबुधः॥१७॥निषिद्धेष्वनिषिद्धेषु परमं
भोगेष्वाप्तेषुदैवतः॥अहितानेवतानूपश्येत्तृतीयाभूमिलक्षणम्॥१८॥भूमिकात्रितयाभ्यासा
न्नाशमेतिरजस्तमः॥ततःसत्वगुणापत्तिस्तयास्वच्छाभवेन्मतिः॥१९॥सदामुक्तोस्मिबुद्धोस्मिकू
मेऽज्ञानंकुबंधनम्॥इत्यादिप्रत्ययःसंम्यक्चतुर्थीभूमिलक्षणम्॥२०॥पंचमीलक्षणंसुप्तेराद्या
वस्थानवांकुश॥स्वब्रह्मत्वस्मृतिःसैवसाजीवत्वस्यविस्मृतिः॥२१॥अज्ञाननाशिनीसैवसैवस्याद्म
द्वै तात्मिका॥परिणत्याद्वैयाषष्ठीयोगनिद्राचसप्तमी॥२२॥इत्युक्तभूमिकाभ्यासात्स्वतत्त्वमनुभाव्यच॥
यथेच्छयाचरेद्विद्वान्जडोन्मत्तपिशाचवत्॥२३॥इतिभूमिकालक्षणम्॥ ॥ ॥यथायथाभवेत्सूक्ष्मो
हंकारोयंतथातथा॥प्रकाशतेनिजानंदःप्रोक्ताभ्यासस्ययोगतः॥१॥तस्मिन्सर्वात्मनानष्टेसाक्षा
द्ब्रह्मात्मकंपरम्॥पुमान्स्वरूपमापन्नोजीवन्मुक्तिंप्रपद्यते॥२॥सुप्तोजागर्तियोविद्वान्यस्यजागरणं

१नू

नहि॥ निजानंदाब्धिमग्नो योजीवन्मुक्तः सउच्यते॥३॥ द्वैताभावेतु नो निद्रालयाभावेन जागरः॥
ईदृशी सहजावस्था जीवन्मुक्तस्य योगिनः॥४॥ त्वमहंसोयमित्यादि विभागो भ्रमकल्पितः॥ स्वात्म
न्येवाद्वये शांते तं विश्वात्मानपश्यति॥५॥ नोपकारकरं स्तौति न निंदत्यपकारिणम्॥ न कुप्यति
प्रियध्वंसे प्रियलाभे न हर्षति॥६॥ नाशास्ति न जिहासास्ति विषये ह्यस्य योगिनः॥ यदृच्छया
कूर्मः स्तु भुंजानोऽनहंकारो गतभ्रमः॥७॥ न समाधिर्न विक्षेपो न ज्ञानं न च मूढता॥ न दीनत्वं न चैश्वर्य
मुपशांतस्य योगिनः॥८॥ स्वच्छंदचारी निर्बंधो निःसंगो गतवासनः॥ चेष्टते पूर्वसंस्कारैर्वायु
नाशुष्कपर्णवत्॥९॥ जनान्नैवोद्विजेत्कांश्चित्कैश्चिन्नोद्विजते स्वयम्॥ अनमर्षो गतोद्वेगस्ति
ष्ठन्नानंदवारिधौ॥१०॥ सच्चिदानंदसंदोहरसामृतसरित्पतौ॥ मग्नः खपुष्पवत्सर्वं जग
त्पश्यति निःश्रमम्॥११॥ हृदि कामा न विद्यंते देहे नैवास्य हंकृतिः॥ मृत्योरपि भयं नास्ति जी
वन्मुक्तस्य योगिनः॥१२॥ ॥इति जीवन्मुक्तप्रकरणम्॥ ॥

यावत्प्रारब्धकर्मास्तितावद्देहस्ततोभवेत्॥कैवल्यसंज्ञकामुक्तिःक्षीणेप्रारब्धकर्मणि॥१॥
नैवास्योत्क्रमतेप्राणोनास्तिलोकांतरेगतिः॥अत्रैवशीर्यतेदेहोजलेसैंधवपिंडवत्॥२॥इति
कैवल्यमुक्तिः॥ ॥नमयाऽयंकृतोग्रंथःस्वपांडित्यप्रसिद्धये॥उपकारार्थमेवातोग्रा
ह्यमेषस्यतांबुधैः॥१॥आसीद्गुर्जरवासिभूसुमनसांमोढीत्यजातीयकोत्राचार्येत्युप
नामकोगणितविद्धामोहराख्योद्विजः॥श्रीमत्सद्गुरुदेवदैवकृपयाब्रह्मात्मबोधाभिधोग्रं
थोयंरचितःकृपालुकमलानाथेनतत्सूनुना॥२॥इतिश्रीब्रह्मात्मबोधाख्यंवेदांतप्रकर
णंसमाप्तम्॥ ॥

मु० बिन्द्राबन लोई बाज़ार भजना श्र
...मसरनदास जिला० मथुरा
...की धर्मशाला